# धर्मशास्त्रोक्तरीत्या राज्ञः इन्द्रियजयः

**अभिषेक-मुखोपाध्यायः**
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्
abhisekrkmv@gmail.com

## सारांशः

*इन्द्रियाणाम् उपरि विजयप्राप्तिः न कश्चन सामान्यः अकस्मात्साध्यश्च विषयः अपि तु सुदीर्घसमयाभ्यासस्य फलमेव । बहवः मुनयः ऋषयश्च साफल्यद्वारे समागतसत्त्वेऽपि मुहूर्तदुर्बलतया साफल्याद् वञ्चिताः अभवन् । अतः धैर्याभ्यासरूपपरीक्षायाम् अन्तिमक्षणपर्यन्तं सततम् अविचलितो भूत्वा लक्ष्यं प्रति एकाग्रमनोनिवेशेनैव विजयता सम्भूयेत । अत्र मदीये शोधपत्रे राष्ट्रनियन्त्रा राज्ञा (सर्वकारेण) इन्द्रियजयः केन सम्पद्येत तद्विषये आचार्यकौटिल्यीयार्थशास्त्रीयाणि तथा च आचार्यभृगुप्रोक्तानि वचनानि यथामति प्रस्तुतानि ।*

## प्रस्तावना

भारतवर्षस्य राष्ट्रनीतिः राजधर्मः वा मानवधर्मस्यैव अङ्गविशेषः । वस्तुतः सर्वविधाः धर्माः राजधर्माश्रिताः एव । अतः महाभारते उक्तमस्ति "सर्वे धर्मा राजधर्मप्रधानाः" इति । दण्डनीतिः इति राजधर्मस्यैव पर्यायवाची शब्दः । राजधर्मपरिचालनाय अर्थस्य आवश्यकतास्ति इत्यतः दण्डनीतिः अर्थशास्त्रञ्च द्वे परस्परे परिपूरके स्तः । प्राचीने भारते सर्वेषु राज्येषु राजतन्त्रं प्रतिष्ठितमासीत् । तत्र राज्येषु राजा हि सर्वमयः कर्ता आसीत् । राज्ञः स्मरणीयम् आसीत् यत् प्रजानां सुखमेव निजसुखम्, प्रजानां कल्याणमेव निजकल्याणमिति[1] । दुष्टेभ्यः प्रजारक्षणम्, दुष्टानां दमनम्, शिष्टानां पालनम्, प्रजानां पापाचरणाद् निवारणम्, स्वराष्ट्रपरराष्ट्रविषयकं कार्यपरिचालनम्, अर्थागमस्य पथप्रशस्तीकरणं प्रभृतीनि कार्याणि राज्ञः कर्तव्यरूपेण निर्दिष्टानि वर्तन्ते । न केवलं कौटिल्यस्य अर्थशास्त्रम्[2], अपि तु कामन्दकस्य कामन्दकनीतिसारः[3], शुक्राचार्यस्य शुक्रनीतिसारः[4], भोजस्य युक्तिकल्पतरुः[5] इत्यादिषु राजनीतिविषयकग्रन्थेषु राज्यशासनस्य नियमाः लिपिबद्धाः वर्तन्ते । राजा यथा सर्वभूतस्य नियन्ता भूत्वा अपि स्वेच्छाचारी न भवेत् तदर्थं शास्त्रप्रणेतारः जागरूकाः आसन् । विजिगीषूणां राज्ञां कृते शासनरीतीः प्रणयित्वा एतैः महद्भिः राजनीतिवेतृभिः शासनव्यवस्था सुदृढा सुस्थिता च कृता इति निश्चप्रचम् ।

## अर्थशास्त्रम्

'अर्थशास्त्रम्' इति भारतीयराजधर्मस्य तथा विश्वराजनीतेः आकरग्रन्थः । आधुनिकयुगे राज्यशास्त्रम् (Political Science) इति शब्देन मानवीयविद्यायाः या शाखा ज्ञायते प्राचीने भारते तस्याः एव नाम आसीत् दण्डनीतिः, राजनीतिः,

---

[1] प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् । नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ॥ (अर्थशास्त्र० अधि.1/अ.19/39)

[2] ख्री. पू. चतुश्शतकम्

[3] ख्री. ५-७ शतकम्

[4] ख्री १२-१७ शतकम्

[5] १०२५ ख्री.

राजधर्मः, नीतिशास्त्रम्, अर्थशास्त्रं वेति। वैदिके युगे अस्य नाम आसीत् क्षत्रविद्या (क्षत्रियराज्ञः राष्ट्रशासितुः वा ज्ञातव्या विद्या)। चतसृषु विद्यासु[6] अन्तिमा विद्या दण्डनीतिः भवति, तयैव यथा राष्ट्रे न्यायस्य तथा च धर्मस्य प्रतिष्ठा भवति तथैव अन्यायस्य अधर्मस्य च विनाशः अपि भवति। आन्वीक्षिकी, त्रयी, वार्ता चेति तिसृणां विद्यानां योगक्षेमकारिका हि दण्डनीतिः। दण्डः नाम दमनम् अर्थात् राष्ट्रपरिचालनाय शासनं नियमश्च। सर्वलोकानां कल्याणाय ईश्वरः एव ब्रह्मतेजोमयमिमं दण्डं[7] धर्मरूपेण सृष्टवान्। अतः दण्डः तथा दण्डधरः राजा समाजे धर्मस्य प्रतिभूः इति। अर्थशास्त्रम् इति नामश्रवणमात्रेण मूलतः राजनीतिसम्बद्धाः विषयाः मनसि आगच्छन्ति तथापि अर्थशास्त्रस्य आभिधानिकार्थः अर्थस्य शासनमिति। एतेन अर्थशब्देन मानववृत्तिः, नागरिकवासभूमिः तथा सम्पूर्णं राष्ट्रमेव बुध्यते। तस्य राष्ट्रस्य रक्षा, पालनं तथा समृद्धिसाधनस्य विधानानि यस्य शास्त्रस्य आलोच्यः विषयः तच्छास्त्रं हि अर्थशास्त्रमिति। धर्मादिषु चतुर्वर्गेषु अर्थः एव प्रधानः इति आचार्यस्य मतम् – **"अर्थः एव प्रधानः इति कौटिल्यः। अर्थमूलौ हि धर्मकामाविति"**[8] इति। यद्यपि आपातदृष्ट्या धर्मार्थौ भिन्नरूपेण प्रतिभातः तथापि भारतीय-विचार-धारायां धर्मः अर्थः च एतौ द्वौ एव परस्परौ अन्योन्याश्रितौ भवतः। अस्माकं जीवने धनस्य स्थानं महत्त्वपूर्णम् अस्ति। धर्माचरणाय तथा धार्मिक-नित्यकर्मणाम् आचरणाय धनम् अपेक्षितम् अस्ति। सामाजिक्याः सुखप्राप्तेः द्वे स्रोतसी प्रायः भवतः – व्यक्तिकेन्द्रिकं समष्टिकेन्द्रिकं च इति। उभयत्र सुखप्राप्तये धनस्य महत् गुरुत्वम् अस्ति। धनस्य अभावात् सुखस्य पूर्तिः न सङ्गच्छते। तर्हि अत्र प्रश्नः उदेति यत् ननु धनं विना धार्मिककार्यं न भवेत् चेत् धनहीनाः जनाः किं धार्मिकाः कदापि न स्युः वा ? उच्यते यदि एवमेव भवेत् तर्हि सर्वे धनिकाः एव धार्मिकाः मोक्षाधिकारिणः च भवेयुः। अपरत्र धनाभावात् निर्धनाः अधार्मिकाः मोक्षात् वञ्चिताः च भवेयुः। ईश्वरस्य सृष्टिचक्रम् अतीव विचित्रम् अस्ति। क्वचित् समाजे ये धनिकाः ते एव धनगर्वात् लोभात् च अधार्मिकाः सञ्जाताः इति दृश्यन्ते। अपरत्र निर्धनेषु अनेके सन्ति ये सज्जनाः, निरहङ्कारिणः भगवत्प्राणाः च ते यथासाध्यं यथामति च धर्मकार्ये संलग्नाः भवन्ति अनन्तरं तेषां भगवत्प्राप्तिरूपेण कामनापूरणात् परं मोक्षप्राप्तिः भवति। वस्तुतः कामः अर्थात् इच्छा। सज्जनानां भगवत्प्राप्तिः इति एव इच्छा भवति। भगवन्तं विना एतेषां मनः अन्यत्र कुत्रापि न लगति। किन्तु धनगर्वेन मत्ताः भूत्वा जीवनस्य मूललक्ष्यात् विच्युताः च भूत्वा इतोऽपि धनवर्धनम् एव येषाम् एकमेव लक्ष्यं भवति ते अचिरेण एव विनष्टाः भवन्ति। वस्तुतः धनप्राप्तेः अनन्तरं तस्य धनस्य उपयोगः कथं भवेत् तदनुसारम् एव धार्मिकता वर्तते। सर्वदैव धनस्य सदुपयोगः एव कर्तव्यः। दुरुपयोगाय प्रयुक्तं धनं धार्मिकतायाः पथि बाधकम् एव भवति।

अर्थशास्त्रमिति अभिधानं सर्वप्रथमं महाभारते एव प्राप्यते। दण्डनीतिरिति तस्मादपि प्राचीना। अतः कौटिल्यप्रणीतार्थशास्त्रम् इति सुप्रसिद्धसत्त्वेऽपि पण्डितसमाजे "अर्थशास्त्रम्" इत्यपेक्षया तस्य दण्डनीतिः, राजधर्मः, नीतिशास्त्रं चेत्यादीनि नामानि विश्रुतानि सन्ति। किन्तु उपर्युक्तानां राजधर्म-दण्डनीत्यादीनां सुष्ठु परिचालनं तदैव भवेत् यदा राजा स्वयं जितेन्द्रियः भवेत्। यतो हि श्रेष्ठान् अनुसृत्यैव इतरजनाः आचरन्ति। श्रीमद्भगवद्गीतायां तदेवोक्तमस्ति –

**यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**
**स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते॥**[9]

[6] आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्या (अर्थ०/अधि.1/अ.1)

[7] तस्यार्थे सर्व्वभूतानां गोप्तारं धर्म्मात्मजम् / ब्रह्मतेजोमयं दण्डमसृजत् पूर्व्वमीश्वरः॥१४॥(मनु० अध्याय ७)

[8] *अर्थशास्त्र० अधि.1/अ.7/10-11*

[9] श्रीमद्भगवद्गीता ३/२१

## राज्ञः इन्द्रियजयः

राज्ञः आचरणम् तस्य प्रजाः अनुकुर्वन्ति । अतः तस्य सुष्ठु शास्त्रोक्ताचरणम् एव काम्यम् । महापुरुषस्य सुष्ठु आचरणेन समुद्बुद्धाः भूत्वा साधारणाः तद्वदेव आचरन्ति । तथैव कस्यचन राष्ट्रस्य राज्ञः आचरणं दृष्ट्वा तदेव प्रजाः अनुसरन्ति । सः राजा न तु साधारणः, बालेऽपि सः सर्वाभिः प्रजाभिः पूज्यः । अराजकतां विनाशार्थं लोकानां रक्षार्थञ्च स्वयं सृष्टिकर्ता राजानम् असृजत् । मनुस्मृतेः राजधर्मे तद्विषये समुक्तमस्ति –

**अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।**
**रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः॥**[10]

अपि च,

**बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।**
**महती देवता ह्येषा नररूपेण तिष्ठति ॥**[11]

अर्थात् स्वयं देवता हि नररूपेण राज्ञि तिष्ठति । अतः नररूपी देवः न कदापि अवमानानायोग्यः इति ।

ज्ञानवृद्धेन वयोवृद्धेन सह संयोगस्थापनेन राज्ञः ज्ञानवृद्धिः भवेदिति उपदिश्यते । यतो हि ज्ञानमेव सुशासनस्य एक एव पन्थाः । पुनश्च ज्ञानिनां नित्यशत्रुः हि कामना या वह्निः इव दुष्पूरणीया[12]; तन्निराकर्तुम् अर्थशास्त्रस्य प्रथमाधिकरणस्य 'इन्दियजयः' नामके षष्ठाध्याये कामादिषड्रिपूणां विजयः प्राधान्येन प्रतिपादितः अस्ति ।[13] पञ्चकर्मेन्दियाणां पञ्चज्ञानेन्द्रियाणाम् अवरोधप्रवृत्तिः हि इन्द्रियजयः । कर्णः, त्वक्, नेत्रम्, जिह्वा, नासिका च इत्येतेषाम् इन्द्रियाणां विषयाः यथा शब्दः, स्पर्शः, रूपम्, रसः, गन्धः चैतेषु अप्रवृत्तिरेव इन्द्रियजयः । अथवा शास्त्रोक्तकर्तव्याणां सम्यग् अनुष्ठानमेव इन्द्रियजयः । शास्त्रविहितानां कर्तव्याणां विपरीतानुष्ठाता इन्द्रियलोलुपः राजा आसमुद्रपृथिवीं जित्वापि अचिरेणैव विनश्यति । जितेन्द्रियः राजा हि सम्पूर्णे विश्वे चिराय सुशासनं प्रयोक्तुं वस्तुं च प्रभवेत् । मनुस्मृतौ अपि अस्य समुल्लेखः वर्तते । यथा -

**इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।**
**जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥**[14]

अर्थात् चक्ष्वादीन्द्रियाणि यथा विषयासक्तानि न भवन्ति तद्विषये सततं प्रयत्नं करणीयम् । यतो हि जितेन्द्रियः राजा हि सर्वाः प्रजाः वशीकर्तुं शक्नुयात् इति ।

अजितेन्द्रियराज्ञां भाविनि काले भाग्यं कीदृशं भवेत् तद्विषये अर्थशास्त्रे पर्यालोचितमस्ति । कश्चन भोजवंशीयः दाण्डक्यनामकः नृपतिः आसीत् । स कामवशेन काञ्चन ब्राह्मणकन्याम् अपहृतवान् तेन तस्याः पितुः शापवशात् सः सपरिवारः

---

[10] मनु० ७/३

[11] मनु० ७/८

[12] आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा । कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥(श्रीमद्भगवद्गीता ३/ ३९) ।

[13] "विद्याविनयहेतुरिन्द्रियजयः; कामक्रोधलोभमानमदहर्षत्यागात्कार्यः । कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिः इन्द्रियजयः, शास्त्रार्थानुष्ठानं वा । कृत्स्नं हि शास्त्रार्थमिदमिन्द्रियजयः"(कौ० अर्थशास्त्र०, प्रथम अधि०, षष्ठ अध्या०)

[14] मनु० ७/४४

सराष्ट्रः च विनष्टः जातः। सैव गतिः विदेहराजेन करालेनापि सम्प्राप्ता। क्रोधवशाद् राजा जनमेजयोऽपि ब्राह्मणैः सह कलहं कृत्वा शापेन विनष्टः बभूव। तथैव भृगुवंशीयैः साकं कलहेन तालजङ्घः इति कश्चन भूपतिः तामेव दुर्गतिं प्राप्तवान्। लोभाभिभूतः भूत्वा इलायाः पुत्रः पुरुरवा अपि ब्राह्मणादिचतुर्वर्णेभ्यः पीडां जनयित्वा तेषां धनं चापहत्वा अभिशापेन भ्रष्टः बभूव। सैव दशा सैवीरदेशस्य राज्ञः अजबिन्दोः बभूव। अभिमानी रावणः परपत्नीम् अपहत्य, दुष्टः दुर्योधनः निजभातृभ्यः राज्यस्य न्याय्यभागम् अदत्त्वा अन्यायेन च पराभूतौ बभूवतुः। मदेन मत्तः राजा डम्भोद्भवः निजप्रजाभ्यः तिरस्कारेण नरनारायणसहितयुद्धेन च विनाशं प्राप्तवान्। अनेनैव कारणेन हैहयराजः अर्जुनः अपि परशुरामेण हतः बभूव। हर्षे वशीभूय वातापिनामा असुरः महर्षिणः अगस्त्यस्य प्रवञ्चनात् तस्य शापेन पञ्चत्वं प्राप्तः। यादवाः द्वैपायनव्यासेन समं कपटापराधाद् सवंशाः विनष्टाः बभूवुः। इतोऽपि अनेके राजानः आसन् ये एवमेव इन्द्रियाणि अवशीभूय अपितु इन्द्रियेषु वशीभूय अचिरेण विनाशं सम्प्राप्तवन्तः। श्रीरामचन्द्रादयः देवतुल्याः केचन नृपतयः जितेन्द्रियाः भूत्वा अमरत्वं प्राप्तवन्तः। अर्थशास्त्रे एतादृशानां राज्ञां नामानि यथा - जामदग्न्यः, अम्बरीषः नाभागश्चेति[15]।

वस्तुतस्तु अयम् इन्द्रियाणां निग्रहः न सामान्यः विषयः अपि तु सुदीर्घाभ्यासस्य फलमेव। यतो हि अयम् इन्द्रियनिग्रहः मनसः विषयः इत्यतः मनसः निग्रहेण एव इन्द्रियाणि जेतुं शक्यन्ते। श्रीमद्भगवद्गीतायां भगवदुक्तम् -

**असंशयं महाबाहो मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥**[16]

वारम्वारं व्यर्थीभूयापि एकाग्रतया अभ्यासपूर्वकेण च तत्रैव मनसः संलग्नीकरणेनैव फलं करायत्तीभूतं स्यात्। केचन क्वचित् एवं मन्यन्ते यथा विषेण विषक्षयः भवति तथैव अधिकेन कामाभ्यासेन कामनापि मनसः चिरं दूरीभवेत्। किन्तु तेषां मनःप्रसूताम् एतादृशीं मिथ्या धारणां निराकर्तुं मनुसंहितायाम् आचार्योक्तिः –

**न जातु कामः कामानामुपभोगेन शाम्यति।**
**हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥**[17]

विषयोपभोगेन न कदापि कामनायाः परितृप्तिः भवति अपितु पूर्वापेक्षया अधिकं भवति यथा घृतेन अग्निनिर्वापणं न भवति प्रत्युत अग्निः इतोऽपि प्रज्वलितः एव भवति। यः समुदयविषयं लभते भुञ्जते तथा च यः लब्ध्वापि कृत्स्नां विषयवासनां त्यजति इत्येतयोः विषयभोगिनः अपेक्षया विषयत्यागी हि श्रेष्ठः। अस्य प्रमाणं मनुस्मृतौ भाति –

**यश्चैतान् प्राप्नुयात् सर्वान् यश्चैतान् केवलांस्त्यजेत्।**
**प्रापणात् सर्वकामानां परित्यागः विशिष्यते॥**[18]

इहलोके प्रायशः सर्वे भोक्तुमेव इच्छन्ति प्रत्यक्षं भोग्यवस्तु विहाय को वा त्यक्तुम् इच्छति। यः भोज्यवस्तु प्रति निस्पृहः भूत्वा प्रकृत्या तत् त्यजति सः एव महत्त्वस्य प्रतीकम्। अस्माकं भारतवर्षं हि स्वयं त्यागस्य एव प्रतीकम्। भारतमातुः पुत्राः सत्यरक्षार्थं

[15] शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः। अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्॥७॥ (अर्थ० अधि.1/अ.6)

[16] श्रीमद्भगवद्गीता ६/ ३५

[17] मनु०/२/९४

[18] मनु ०/२/९५

तथा च सार्वभौमिकत्वस्य सुरक्षायै अनायासेनैव प्राणाः अपि त्यक्तुं दृढप्रतिज्ञाः सन्ति। तेषु दृढचेतःसु पुत्रेषु सर्वादौ त्रेतायुगपुरुषस्य श्रीरामचन्द्रस्य नाम आपामर-भारतवासिनां तथा च विश्ववासिनां मनःसु सुचिरम् अक्षयत्वेन वरिवर्ति। परवर्तिनि एतादृशानां सुपुत्राणाम् आविर्भावः युगे युगे भारतवर्षे बहुत्रैव लक्षितः वर्तते। बहुषु शास्त्रेषु अपि त्यागमहिमा स्वर्णाक्षरे स्वङ्कितः अस्ति। यथा ईशोपनिषदि –

**"तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्"**- इत्यादि वाक्यं बहु प्रसिद्धम्।

इदानीं मनसि काचन शङ्का उदेति – यदि राजा स्वयं विषयेषु सम्पूर्णतया अनासक्तः त्यागप्रतिमूर्त्तिश्च भूत्वा संसारबन्धनादीनि सर्वाणि कर्माणि परित्यज्य मनः विरागतुल्यं कुर्यात् तर्हि शासनव्यवस्थायाः का गतिः भवेत्? सुशासनस्य अभावात् दुष्टाचारस्य प्राबल्यं वर्धितं भवेत्; समाजे न्यायः अन्याये च परिणमेत। अतः राजा यथा तन्मतिसम्पन्नः न भवेत् तदर्थं श्रीमद्भगवद्गीतायां भगवद्वचनद्वयं यथा –

**न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।**
**नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥**[19]
**यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः।**
**मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥**[20]

अर्थात् यदि स्वयं नियन्ता एव संयमी भूत्वा लौकिककर्माणि त्यजेत् तर्हि सुशासनस्य अभावात् समुदयविनाशः आगच्छेत्। अतः लोकसंग्रहार्थं राजा एवं कदापि न कुर्यात्। सृष्टिधारायाः प्रवहमानतां सुशासकः सुशासनेनैव अग्रेसारयेत्।

इदानीम् इन्द्रियनिग्रहकाले किं राजा **'साक्षात्'** विषयभोगात् पराङ्मुखी भवेत् उत केन भवेत्? इति प्रश्ने मनुसंहिताकारेण समुच्यते यत् प्रकृतविषयः एवं न। निसर्गतः एव इन्द्रियाणि विषयेषु समासक्तानि। इन्द्रियाणि विषयसेवाम् अकृत्वा निवर्तयितुं न शक्यानि अपि तु विषयाणां नश्वरत्वादिना दोषज्ञानेन तानि विषयेभ्यः निवर्तयितुं शक्यानि। अतः प्रथमोक्तेन उपायेनैव (विषयाणां नश्वरत्वादिना दोषज्ञानेन एव) इन्द्रियाणां निग्रहः कार्यः[21]। मनुसंहिताकृता जितेन्द्रियस्य निर्दिष्टमेकं लक्षणं दीयते यथा –

**श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः।**
**न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः॥**[22]

स्तुतिवादं निन्दावादं वा श्रुत्वापि, सुखं दुःखञ्च स्पृष्ट्वापि सुरूपं कुरूपञ्च दृष्ट्वापि, स्वादिष्टम् अस्वादिष्टं वा भोज्यं भुक्त्वापि, दुर्गन्धं सुगन्धं वा प्रघ्रायापि च यस्य हर्षः विषादः वा न भवति सः एव जितेन्द्रियः। यदि कस्मिंश्चिद् जलपूर्णे पात्रे एकमपि छिद्रं स्यात् तर्हि तद्द्वारैव समग्रजलं बहिः निर्गच्छति तथैव इन्द्रियेषु एकमपि इन्द्रियं कस्मिंश्चिद् विषये समासक्तं चेत् अन्येषाम्

---

[19] श्रीमद्भगवद्गीता ३/२२

[20] श्रीमद्भगवद्गीता ३/२३

[21] न तथैतानि शक्यन्ते संनियन्तुमसेवया। विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः॥(मनु० २/९६)

[22] मनु० २/९८

इन्द्रियाणां संयतत्वे अपि तस्य तत्त्वज्ञानं विलुप्तं भवति[23]। अतः अत्यन्तं सावधानेन इन्द्रियाणि संयमनपूर्वकेन राजा राजधर्मं परिपालयेत् यतो हि अयं मार्गः अतीव दुर्गमः पुनरपि उपनिषदि[24] उक्तमस्ति –

**उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत ।**
**क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति ॥**

इति शम् ।

## सन्दर्भग्रन्थसूची


१. दातारः श्रीविश्वनाथशास्त्रि, **कौटलीयार्थशास्त्रम्,** सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९१.

२. गैरोला श्रीवाचस्पति, **कौटिलीयम् अर्थशास्त्रम्** (हिन्दीव्याखोपेतम्), चौखम्बा विद्याभवनम्, वाराणसी, १९८४.

३. वन्द्योपाध्यायः धीरेन्द्रनाथ, **संस्कृतसाहित्येर इतिहास,** पश्चिमबङ्ग-राज्य-पुस्तक-पर्यद्, कलिकाता, २००८.

४. दासः देवकुमार, **संस्कृतसाहित्येर इतिहास,** सदेशः, कलिकाता, २००१.

५. मुखोपाध्यायः श्रीसतीशचन्द्र, मुखोपाध्यायः श्रीउपेन्द्रनाथ, **मनुसंहिता**, वसुमती-शास्त्र-प्रचारः, कलिकाता

६. **श्रीमद्भगवद्गीता**, गीताप्रेस, गोरखपुर, १९९८.


*****

[23] इन्द्रियाणान्तु सर्वेषां यद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥(मनु० २/ ९९)

[24] कठो०/अध्या०२/वल्ली०३/मन्त्र१४